(शिवः। यथा, महाभारते तस्य सहस्रनामकीर्त्तने। १३। १७। १०६।

"वणिज्रो वर्द्धकी वृच्चो वकुलश्चन्दनश्छदः।
सारग्रीवो महाजत्रुरलोलश्च महौषधः॥")

व(व)कुला, स्त्री, (बकुल + टाप्।) कटुका। इति राजनिर्घण्टः॥

व(व)कुली, स्त्री, (बकुल + गौरादित्वात् ङीष्।) काकोली। इति शब्दचन्द्रिका॥

व(व)कूलः, पुं, (बकुल। पृषोदरादित्वात् दीर्घः।) बकुलवृक्षः। इति शब्दरत्नावली॥

व(व)केरुका, स्त्री, (बकानां बकसमूहानां ईरुकं गतिर्यत्र।) बलाका। वातावर्ज्जितशाखा। इति मेदिनी। के, २०२॥

वकोटः, पुं, बकः। इति त्रिकाण्डशेषः॥

वठ, पैन्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) पैन्यमिह सामर्थ्यम्। वठति वीरो योद्धुं समर्थः स्यादित्यर्थः। इति दुर्गादासः॥

व(व)ड़वा, स्त्री, (वलं वातीति। बल + वा + कः। टाप्। डलयोरैक्यात् लस्य ड़त्वम्।) घोटकी। इत्यमरः। २। ८। ४३॥ (यथा, महाभारते। १। २२२। ४५।

"वड़वानान्तु शुद्धानां चन्द्रांशुसमवर्च्चसाम्।
ददौ जनार्द्दनः प्रीत्या सहस्रं हेमभूषितम्॥"

अस्या दुग्धगुणा यथा,—

"रूक्षोष्णं वड़वाक्षीरं बल्यं शोषानिलापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

वड़वारूपधारिणी सूर्य्यपत्नी संज्ञा। यथा, मार्कण्डेयपुराणे। ७७। २३।

"सूर्य्यतापमनिच्छन्ती तेजसस्तस्य बिभ्यती।
तपश्चचार तत्रापि वड़वारूपधारिणी॥"

अस्या विशेषविवरणन्तु तत्रैव विशेषतो द्रष्टव्यम्॥ तृतीया सूर्य्यपत्नी। इति केचित्। यथा, भागवते। ८। १३। ८—९।

"विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे।
संज्ञा छाया च राजेन्द्र! ये प्रागभिहिते तव॥
तृतीयां वड़वामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

अश्विनीनक्षत्रम्। इति ज्योतिषम्॥ (नारीविशेषः। इति हेमचन्द्रः॥ दासी। यथाह नारदः।

"भक्तदासश्च विज्ञेयस्तथैव वड़वाकृतः॥"

वासुदेवस्य स्वनामख्याता परिचारिका। इति हरिवंशः। ३५। ३॥) वाड़वाग्निः। अस्योत्पत्तिर्यथा,—

"अथाकाशगता देवाः क्रुद्धं दृष्ट्वा महेश्वरम्।
प्रसीद जगतां नाथ! कामे क्रोधं परित्यज॥
इति स्म वदतां तेषाममराणां तदानलः।
ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम्॥
ब्रह्मा क्रोधानलं शम्भोर्घ्नन्तं सकलान् जनान्।
वड़वारूपिणं चक्रे देवानां पुरतस्तदा॥
वड़वां तां तदा देवाः सौम्यां ज्वालामुखीं
शुभाम्।
दृष्ट्वा निर्विग्नमनसो बभूवुः पूर्व्वपीड़िताः॥
वड़वां तां समादाय तदा ज्वालामुखीं विधिः।
सागरं प्रययौ लोकहिताय जगतां प्रभुः॥
गत्वाथ सागरं ब्रह्मा प्रोवाच परिपूजितः।
यथावत्तेन विप्रेन्द्राः समयश्च निदेशयन्॥
अयं क्रोधो महेशस्य वड़वारूपधृक् त्वया।
ज्वालामुखः सदा धार्य्यो यावन्न विलयाम्यहम्॥
यदा त्वामहमागम्य वदामि सरितांपते!।
तदा त्वया परित्याज्यः क्रोधोऽयं वड़वामुखः॥
भोजनं भवतस्तोयमेतस्य तु भविष्यति।
यत्नादेव विधार्य्योऽयं यथा नो याति चान्तरम्॥
इत्युक्तो ब्रह्मणा सिन्धुरङ्गीचक्रे तदा क्रुधम्।
ग्रहीतुं वड़वावक्त्रं शम्भोश्चाशक्यमप्यरम्॥
ततः प्रविष्टो जलधौ पावको वड़वामुखः।
वार्य्योघविड्दहंस्तस्य ज्वालामालातिदीपितः॥"

इति कालिकापुराणे ४१ अध्यायः॥

(नदीविशेषः। यथा, महाभारते।३।२२१।२४।

"तमसा नर्म्मदा चैव नदी गोदावरी तथा।
वेण्णोपवेण्णा भीमा च वड़वा चैव भारत!॥"

तीर्थभेदः। यथा, महाभारते।३। ८२। ८८।

"ततो गच्छेत वड़वां त्रिषु लोकेषु विश्रुताम्।
पश्चिमायान्तु सन्ध्यायां उपस्पृश्य यथाविधि॥")

व(व)ड़वाकृतः पुं, (वड़वया दास्या कृतः।) पञ्चदशदासान्तर्गतदासविशेषः। यथा,—

"भक्तदासश्च विज्ञेयस्तथैव वड़वाकृतः॥"

इति नारदः॥

वड़वा दासी तल्लोभादङ्गीकृतदास्यः। इति दायक्रमसंग्रहः॥ कुत्रचित् वड़वाभृतो वड़वाहृतोऽपि पाठः॥

व(व)ड़वाग्निः, पुं, (वड़वायाः समुद्रस्थितायाः घोटक्या मुखस्थोऽग्निः।) समुद्रस्थाग्निः। (अस्य विवरणन्तु वड़वानलशब्दे द्रष्टव्यम्॥)

व(व)ड़वानलः, पुं, (वड़वाया अनलः।) वड़वाग्निः। तत्पर्य्यायः। सलिलेन्धनः २ वड़वामुखः ३ काकध्वजः ४ वाजिजः ५ स्कन्दाग्निः ६ तृणधुक् ७ काष्ठधुक् ८। इति त्रिकाण्डशेषः॥ और्व्वः ९ वाड़वः १०। इत्यमरः।१।१।५६॥ उर्व्वस्य ऋषेरपत्यम् और्व्वः ष्णः। वड़वायां विद्यमानो वाड़वः ष्णः। वड़वाया अनलो वड़वानलः। आधाराधेयभावसम्बन्धः। पुरा किल उर्व्वेण मुनिना अयोनिजं पुत्त्रमिच्छता वह्नौ मथितं तत्र ज्वालामयः पुरुषो जातः स च समुद्रे वड़वामुखे अवस्थापितः। इति पौराणिकाः॥ इति तट्टीकायां भरतः॥ * ॥ तस्य विवरणं यथा,—

"और्व्वस्तु तपसाविष्टो निवेश्योरुं हुताशने।
ममन्थैकेन दर्भेण सुतस्य प्रभवारणिम्॥
तस्योरुं सहसा भित्त्वा ज्वालामाली ह्यनिन्धनः।
जगतो दहनाकाङ्क्षी पुत्त्रोऽग्निः समपद्यत॥
और्व्वस्योरुं विनिर्भिद्य और्व्वो नामान्तकोऽनलः।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः॥
उत्पन्नमात्रश्चोवाच पितरन्दीनया गिरा।
क्षुधा मे बाधते तात! जगद्भक्ष्ये त्यजस्व माम्॥
त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो दिशो दश।
निर्द्दहन् सर्व्वभूतानि ववृधे सोऽन्तकोऽनलः॥
एतस्मिन्नन्तरे ब्रह्मा मुनिमौर्व्वं समागतः।
उवाच धार्य्यतां पुत्त्रो जगतश्च दयां कुरु॥
अस्यापत्यस्य ते विप्र! करिष्ये स्थानमुत्तमम्।
तथ्यमेतन्मम वचः शृणु त्वं वदतांवर!॥

और्व्व उवाच।

धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवान्
शिशोः।
मतिमेतान्ददातीह परमानुग्रहाय वै॥
प्रभातकाले संप्राप्ते काङ्क्षितव्ये समागमे।
भगवंस्तर्पितः पुत्त्रः कैर्हव्यैः प्राप्स्यते सुखम्॥
कुत्र वास्य निवासः स्याद्भोजनन्तु किमात्मकम्।
विधास्यतीह भगवान् वीर्य्यतुल्यं महौजसः॥

ब्रह्मोवाच।

वड़वामुखेऽस्य वसतिः समुद्रे वै भविष्यति।
मम योनिर्जलं विप्र! तत्र मे तोयदं सुखम्॥
अत्राहमासे नियतं पिबन् वारिमयं हविः।
तद्धविस्तव पुत्त्रस्य विसृजाम्यालयंश्च तम्॥
ततो युगान्ते भूतानां मेघवाहश्च पुत्त्रक!।
सहितौ विचरिष्यावो निष्पुराणकराविह॥
एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः।
दहनः सर्व्वभूतानां सदेवासुररक्षसाम्॥
एवमस्त्विति तं सोऽग्निः संवृतज्वालमण्डलः।
प्रविवेशार्णवमुखं विप्रनष्टान्तरप्रभम्॥"

इति मात्स्ये १५० अध्यायः॥

(मर्द्दनदहनाय हरनेत्रसमुद्भूतोऽग्निरपि वड़वानलः। अस्य प्रमाणादिकं वड़वाशब्दे द्रष्टव्यम्॥) लङ्काया दक्षिणे पृथिव्याश्चतुर्थभागरूपस्थानविशेषः। इति सिद्धान्तशिरोमणिः॥ (वटिकौषधविशेषः। यथा,—

"शुद्धताम्रस्य भागैकं मरिचस्य तथैव च।
विषं तत्तुल्यकं दद्यात् तत्सर्व्वं सूक्ष्मचूर्णितम्॥
लाङ्गलीरससंयुक्तं तत्सर्व्वं पुटके पचेत्।
रक्तिकाद्वितयं वापि त्रितयं वा प्रकल्पयेत्॥
दीवे थोषसमायुक्तस्त्रिदोषशमनो भवेत्।
भक्षयेत् पवने चोग्रे वड़वानलसंज्ञितम्॥

इति वड़वानलो रसः॥"

इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

व(व)ड़वामुखः, पुं, (वड़वाया घोटक्या मुखमाश्रयत्वेनास्त्यस्य। अर्श आदित्वात् अच्।) वड़वानलः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ६७। २२।

"सा यथैवार्णवगता तथैव वड़वामुखे॥"

महादेवस्य मुखमित्येके। यथा, महाभारते। ७। २००। १११।

"तस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत।
वड़वामुखेति विख्यातं पिबत्तोयमयं हविः॥"

महादेवस्य नामभेदः। यथा, महाभारते। १३। १७। ५५।